दित्वात् ङीष् ।) गौरी । (यथा, कालिकापुराणे,
"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥")
इन्द्रपुत्त्री । पताका । इति मेदिनी । ते, १०६ ॥ वृक्षविशेषः । तत्पर्य्यायः । जया २ तर्कारी ३ नादेयी ४ वैजयन्तिका ५ । इत्यमरः ।२।४।६५॥ बला ६ मोटा ७ हरिता ८ विजया ९ सूक्ष्ममूला १० विक्रान्ता ११ अपराजिता १२ । (यथा, तिथितत्त्वे ।
"कदली दाडिमी धान्यं हरिद्रा मानकं कचु ।
बिल्वोऽशोको जयन्ती च विज्ञेया नवपत्त्रिका ॥")
अस्याः गुणाः । मदगन्धयुक्तत्वम् । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । क्रिमिभूतनाशित्वम् । कण्ठविशोधनत्वञ्च । तत्र लघ्वी रसायनी । इति राजनिर्घण्टः ॥ एतच्छाकस्य गुणाः । गरदोषनाशित्वम् । चक्षुर्हितत्वम् । मधुरत्वम् । हिमत्वञ्च । इति राजवल्लभः ॥
("श्वेतजयन्ती मूलं पिष्टं पीतञ्च तण्डुलपयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा ॥"
इति वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे ॥)
योगविशेषः । यथा, तिथ्यादितत्त्वे स्कान्दम् ।
"जयं पुण्यञ्च कुरुते जयन्तीमिति तां विदुः ।
रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी ॥
अर्द्धरात्रादधश्चोर्द्ध कलयापि यदा भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्व्वपापप्रणाशिनी ॥"
(द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"उन्मिलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्यष्टौ महापुण्याः सर्व्वपापहरा द्विज ! ॥"
वटिकौषधविशेषः । तद्यथा,—
"विषं पाठाश्वगन्धा च वत्सातालीशपत्त्रकम् ।
मरिचं पिप्पलीनिम्बमजामूत्रेण तुल्यकम् ।
वटिका पूर्व्ववत्कार्य्या जयन्तीयोगवाहिका ॥"
इति जयन्ती वटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
जयपत्त्रं, क्ली, (जयसूचकं पत्त्रम् ।) अश्वमेधीययज्ञघोटककपाले बद्धा लिपिः । तद्यथा,—
"त्रैलोक्यविजयी रामो रावणान्तकरः प्रभुः ।
स दीक्षितो वाजिमेधे तस्यायं प्रोक्षितः पशुः ॥
पालितो लक्ष्मणेनैव सुलक्षणविलक्षितः ।
संपूज्य च परित्याज्यः सर्व्वैरिति च संस्कृताम् ॥"
इति वाशिष्ठरामायणम् ॥ * ॥
विवादविषयकजयबोधकलिपिः । डिक्रि इति इङ्गराजी भाषा । यथा, व्यवहारतत्त्वे ।
"यद्वृत्तं व्यवहारान्तु पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्त्रेऽखिलं लिखेत् ॥
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने लेख्यं जयपत्त्रं तदुच्यते ॥"
जयपालः, पुं, (जयं पालयतीति । पालि + "कर्म्मण्यण् ।" ३।२।१ । इत्यण् ।) विधिः । विष्णुः । भूपालः । इति शब्दरत्नावली । वृक्षविशेषः । जमालगोटा इति भाषा । तत्पर्य्यायः । सारकः २ रेचकः ३ तिन्तिडीफलम् ४ दन्तीबीजम् ५ मलद्रावि ६ बीजरेचनम् ७ कुम्भीबीजम् ८ कुम्भिनीबीजम् ९ घण्टाबीजम् १० घण्टिनीबीजम् ११ निकुम्भाख्यबीजम् १२ शोधनीबीजम् १३ चक्रदन्तीबीजम् १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । विरेचनत्वम् । दीपनत्वम् । क्रिमिकफामजठरामयनाशित्वञ्च । इति राजनिर्घण्टः ॥
जयपुत्त्रकः, पुं, (जयेन विजयेन पुत्त्र इव कायतीति । कै + कः । पुत्त्रतुल्यप्रीतिप्रदत्वात् तथात्वम् ।) पाशकभेदः । इति शब्दरत्नावली ॥
जयमङ्गलः, पुं, (जय एव मङ्गलं यस्य । जयेन मङ्गलं यस्मादिति वा ।) राजवाह्यहस्ती । इति शब्दरत्नावली ॥ ध्रुवकविशेषः । यथा,—
"चतुर्व्विंशतिवर्णाङ्घ्रिः कथितो जयमङ्गलः ।
शृङ्गारवीरयोरेव ताले चाचपुटे च सः ॥"
इति सङ्गीतदामोदरः ॥ * ॥
ज्वरघ्नौषधविशेषः । यथा,—
"हिङ्गुलसम्भवं सूतं गन्धकं टङ्कणं तथा ।
ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा ॥
समं सर्व्वं समाहृत्य द्विगुणं स्वर्णभस्मकम् ।
तदर्द्धं कान्तलौहञ्च रूप्यभस्मापि तत् समम् ॥
तत्समं पारदसमम् ।
एतत् सर्व्वं विचूर्ण्याथ भावयेत् कनकद्रवैः ।
शेफालीदलजेनापि दशमूलरसेन च ॥
किराततिक्तककाथैस्त्रिवारं भावयेत् सुधीः ।
भावयित्वा तु तत् कार्य्या गुञ्जाद्वयमिता वटी ॥
अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम् ।
जीर्णज्वरं महाघोरं चिरकालसमुद्भवम् ॥
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान् ॥
मेदोगतं मांसगतमस्थिमज्जगतं तथा ।
अन्तर्गतं महाघोरं बहिस्थञ्च विशेषतः ॥
नानादेशोद्भवञ्चैव ज्वरं शुक्रगतं तथा ।
निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात् ॥
जयमङ्गलनामायं रसः श्रीशिवनिर्म्मितः ।
बलपुष्टिकरश्चैव सर्व्वरोगनिवर्हणः ॥"
इति श्रीजयमङ्गलो रसः ।
इति भैषज्यरत्नावली ॥
जयवाहिनी, स्त्री, (जयस्य जयन्तस्य वाहिनी यद्वा स्वयंवरसभायां संग्रामे वा जयं वहतीति । वह + णिनिः । ततो ङीप् ।) शची । इन्द्राणी । इति हेमचन्द्रः । २।८६ ॥
जया, स्त्री, (जीयतेऽनया । जि + "एरच् ।" इति करणे अच् ततष्टाप् ।) दुर्गा । (यथा, महाभारते । ६ । २२ । २२ ।
"कात्यायनि महाभागे करालि विजये जये ! ॥")
अस्या व्युत्पत्तिर्यथा,—
"जः कल्याणवचनो ह्याकारो दातृवाचकः ।
जयं ददाति सा नित्यं सा जया परिकीर्त्तिता ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
जयन्तीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"वैजयन्ती च तर्कारी जयन्ती विजया जया ।"
तिथिविशेषः । सा तु तृतीयाष्टमीत्रयोदश्यः । (यथा, ज्योतिषे ।
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ।"
द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्योऽष्टौ महापुण्याः सर्व्वपापहरा द्विजाः ॥")
हरीतकी । दुर्गासखी । इति मेदिनी । ये,२४॥ (यथा, काशीखण्डे । ४७ । ४६ ।
"यथा जया च विजया यथा चैव जयन्तिका ॥"
देवी भगवती तु वराहशैले पीठस्थाने जया-रूपेण विराजते । यथा, देवीभागवते ।७।३०।५२ ।
"वराहशैले तु जया कमला कमलालये ।")
विजया । (यथा, रसप्रदीपे अजीर्णचिकित्सायाम् ।
"चारत्रयं सूतगन्धौ पञ्चकोलमिदं शुभम् ।
सर्व्वैस्तुल्या जया भृष्टा सदर्द्धा शिगुजा वटी ॥")
शान्ताश्वः । नीलदूर्व्वा । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥")
पताकाविशेषः । इति युक्तिकल्पतरुः ॥
(ज्वरघ्नौषधविशेषः । यथा,—
"विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपत्त्रकम् ।
विडङ्गमष्टमं चूर्णं छागमूत्रैः समं समम् ।
चणकाभा वटी कार्य्या स्याज्जया योगवाहिका ॥
जयन्ती वा जया वाथ चौरैः पित्तज्वरापहा ।
सुरामलकयूषेण पथ्यं देयं घृतं विना ॥
जयन्ती वा जया वाथ विषमज्वरनुद्घृतैः ।
सर्व्वज्वरं मधुश्लेष्मैर्वा मूत्रेण शीतकम् ॥
चन्दनस्य कषायेण रक्तपित्तज्वरापहा ।
जयन्ती वा जया वाथ माक्षिकेण च कासजित् ॥
जयन्ती वा जया वाथ गोमूत्रेण युतां पिबेत् ।
हन्त्याशु काकणं कुष्ठं सुलेपेन च तद्द्रुतम् ॥
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पाचयेत् ।
जयन्ती वा जया वाथ मेहं हन्ति सुराह्वयम् ॥
जयन्ती वा जया वाथ मधुना सर्व्वमेहहृत् ।
जयन्ती वा जया वाथ गुडैः कोष्णजलैः पिबेत् ॥
त्रिदोषोत्थं हरेद्गुल्मं रसो वा नन्दभैरवः ।
जयन्ती वा जया वाथ शुण्ठ्या सर्व्वभगन्दरम् ।
जयन्ती वा जया वाथ तक्रेण ग्रहणीप्रणुत् ।
जयन्ती वा जया वाथ भृङ्गराजैर्निशान्धहृत् ॥
जयन्ती वा जया वाथ दृष्टा स्तन्येन चाञ्जनम् ।
आवर्त्तं सर्व्वदोषोत्थं मांसवृद्धिञ्च नाशयेत् ॥"
इति जयाजयन्ती वटी ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥ * ॥)
जयावहा, स्त्री, (जयमावहतीति । आ + वह + अच् ।) भद्रदन्तीवृक्षः । इति राजनिर्घण्टः ॥
जयाश्रया, स्त्री, (जयमाश्रयतीति । आ + श्रि + अच् ।) जरडीतृणम् । इति राजनिर्घण्टः ॥